**द्वितीयः भागः**

# ३. मैत्री

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ?

२. छात्राः किं धृतवन्तः ? किमर्थम् ?

३. चित्रं दृष्ट्वा किं ज्ञातवान् ?

**उद्देश्यम् -**


उत्तममित्रस्य लक्षणानि बोधयित्वा छात्रेषु उत्तममैत्रीगुणस्य, ऋजुवर्तनस्य, नैतिकमूल्यानां च संवर्धनम् ।

**छात्रेभ्यः सूचनाः -**

१. श्लोकान् पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।


३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।




१. कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्यात् तन्मित्रं मित्रमुच्यते ।।

२. उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ।।

३. न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ।।



४. ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं मित्रलक्षणम् ॥

५. दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा ।
यत्र द्रवत्यन्तरङ्गं स स्नेह इति कथ्यते ॥

६. पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥

భావాః :

- శరీరమునకు చేతులమాదిరిగా, కన్నులకు కనురెప్పల మాదిరిగా, నాకు హాని కలుగుతుందేమోనని ఆలోచించకుండా, ప్రతిఫలం ఆశించకుండా ఎవడు మేలుచేస్తాడో అటువంటి మిత్రుడే నిజమైన మిత్రుడు.
- ఉపకారం చేయడం, ప్రియంగా మాట్లాడడం, స్వచ్ఛమైన స్నేహాన్ని అందించడం ఇవన్నీ సజ్జనులకు సహజసిద్ధమైనవి. చంద్రుని చల్లదనాన్ని ఇవ్వమని ఎవరూ చెప్పలేదు కదా! చల్లగా ఉండడమే అతని స్వభావం.
- ఏ ఒక్కరూ ఏ ఒక్కరికీ స్నేహితుడూ కాదు. శత్రువు కూడా కాదు. స్నేహితులైనా, శత్రువులైనా కారణాల చేతనే (పరిస్థితులవల్లే) ఏర్పడుతారు.
- మంచి మిత్రునికి ఉండే ఆరు లక్షణాలను నీతిశాస్త్రకారులు ఈ విధంగా తెలిపారు. 1) మంచిమిత్రుడు మిత్రునికి కావలసినవి ఇస్తాడు. 2) తనకు కావలసినవి మొహమాటం లేకుండా తీసుకుంటాడు. 3) తన రహస్యాలను చెబుతాడు. 4) మిత్రుని రహస్యాలను అడుగుతాడు. 5) మిత్రుని వద్ద సంకోచం లేకుండా తింటాడు. 6) మిత్రునికి ఆనందంగా తినిపిస్తాడు.
- చూడడం, తాకడం, వినడం, మాట్లాడడం మొదలైనవి చేసేటప్పుడు ఎక్కడ మనసు ఆనందపడుతుందో అక్కడే నిజమైన స్నేహముందని పండితులంటారు.
- మంచిమిత్రుడు పాపం చేయకుండా నివారిస్తాడు. మంచిపనులు చేయమని ప్రోత్సహిస్తాడు. మిత్రుని రహస్యాలను దాచి, మంచి విషయాలనే అందరితో చెబుతాడు. ఆపదసమయంలో వదలకుండా వెంట ఉంటాడు. అవసరమైన సమయంలో కావలసింది ఇస్తాడు. ఇలా ఉండటం మంచిస్నేహితుని లక్షణమని సజ్జనులు అంటారు.

© SCERT not to be republished


## एतानि कुर्वन्तु

### I. शृण्वन्तु, विचिन्त्य वदन्तु



१. एते श्लोकाः किम् अधिकृत्य वदन्ति ?
२. पाठगतान् श्लोकान् भावयुक्ततया गायन्तु ।
३. एतेषु श्लोकेषु भवते कः श्लोकः रोचते ? किमर्थम् ?
४. एतस्य पाठ्यांशस्य ''मैत्री'' इति शीर्षिका उचिता वा ? कथम् ?
५. भवतः स्नेहितेषु उत्तमस्नेहितः कः ? तस्य उत्तमगुणाः के ?
६. गणद्वये उपविशन्तु, एकः गणः श्लोकं वदतु । अन्यः गणः भावं वदतु ।

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. **अधः भावाः सन्ति । तेषां सम्बध्दान् श्लोकांशान् पाठे अन्विष्य तेषाम् अधः रेखाङ्कनं कुर्वन्तु, तान् अंशान् पठन्तु च ।**

अ. ఎవడు ఆలోచించకుండ మిత్రునికి మేలు చేస్తాడో అతడే నిజమైన మిత్రుడు.
आ. ఆపదలో ఉన్నప్పుడు వదలిపెట్టడు.
इ. ఎవరు చంద్రుని చల్లగా మార్చారు?
ई. ఈ ఆరు మిత్రుని లక్షణాలు.

२. **पाठस्य आधारेण अधः दत्तानि वाक्यानि समीकृत्य लिखन्तु ।**

अ. अपकारः, अप्रियसम्भाषणम्, कृत्रिमस्नेहः - एतानि सज्जनानां लक्षणानि ।
आ. यः आलोच्य हितं करोति स एव मित्रम् ।
इ. यं दृष्ट्वा, स्पृष्ट्वा, उक्त्वा हृदयं न द्रवति स एव मित्रम् ।
ई. मानवाः परस्परम् अकारणेन मित्राणि भवन्ति ।
उ. सन्मित्रम् हितान्निवारयति, पापाय योजयते ।

३. **अधः दत्तं परिच्छेदं पठित्वा, प्रश्नानां निर्माणं कुर्वन्तु ।**

भावना, हारिके द्वे अपि उत्तमसख्यौ स्तः । भावना हारिकायै प्रतिदिनं पुष्पम् आनीय ददाति । हारिका स्वीकरोति । हारिका अपि गृहतः आनीतं मधुरं भावनायै दत्त्वा एव खादति । द्वे अपि परस्परं प्रियभाषणं कुरुतः ।

४. **पाठस्य आधारेण प्रश्नानां समाधानानि वदन्तु, लिखन्तु च ।**

अ. किं सन्मित्रम् ?
आ. मित्रस्य स्वभावः कथं भवति ?
इ. मित्राणि, शत्रवः वा कथं जायन्ते ।
ई. मित्रस्य लक्षणानि कति ? तानि कानि ?
उ. स्नेहः इत्युक्ते किम् ?
ऊ. सन्तः सन्मित्रलक्षणं किमिति वदन्ति ?

© SCERT not to be republished

## III. स्वीयरचना ।



१. **भवान् कीदृशैः सह मैत्रीं करोति ?**

२. **शरीरस्य अवयवाः अस्मान् उपकुर्वन्तीति जानन्ति खलु ! ते इव मित्रं कथम् उपकरोति ?**

३. **'षड्विधं मित्रलक्षणम्' - इति मित्रस्य षट् लक्षणानि ज्ञातवन्तः खलु ! भवन्तः मित्रस्य इतोऽपि षट् लक्षणानि वदन्तु ।**

४. **द्वयोः मध्ये मैत्री कथं जायते ? कारणानि लिखन्तु ।**

५. **पाठस्य साराशं स्वीयवाक्यैः लिखन्तु ।**

## IV. पदजालाभिवृध्दिः



### १. समुचितपदैः कोष्ठकानि पूरयित्वा वाक्यं रचयन्तु ।

अ. ______ ______ गच्छति ।

आ. सीता ______ ______ ।

इ. ______ पाठशालां ______ ।

ई. ______ ______ कर्तुं ______ ______ ।

### २. उदाहरणस्य साहाय्येन वाक्येषु पदानां क्रमं लिखन्तु ।


उदा ॥ पापात् निवारयति सन्मित्रम् ।
सन्मित्रं पापात् निवारयति ।

अ. हिताय योजयते सन्मित्रम् ।

आ. गुणान् सन्मित्रम् प्रकटीकरोति ।

इ. कुर्यात् प्रियं मित्रम् अविचार्य ।

### ३. चक्रस्य साहाय्येन मित्रं किं किं करोतीति वदन्तु, लिखन्तु ।




**षड्विधं मित्रलक्षणम्**

१. ........................
२. ........................
३. ........................
४. ........................
५. ........................
६. ........................

### ४. 'तुमुन्' प्रत्ययान्तपदम् उपयुज्य वाक्यसंयोजनं कृत्वा लिखन्तु ।

उदा - छात्रः विद्यालयं गच्छति । पाठं पठति ।
छात्रः पाठं <u>पठितुं</u> विद्यालयं गच्छति ।

अ. यात्रिकः नदीं गच्छति । स्नानं करोति ।

आ. वाणी कदलीफलं स्वीकरोति । खादति ।

© SCERT not to be republished

इ.  भास्करः पुस्तकं क्रीणाति । पठति ।

ई.  पावनी कवितां शृणोति । लिखति ।

उ.  प्रणवः श्लोकं लिखति । गायति ।

५.  **मञ्जूषायां विद्यमानं विरुद्धार्थबोधकं पदं स्वीकृत्य वाक्यं पुनः रचयन्तु ।**

स्वीकुर्वन्ति, शत्रुः, अविचार्य, अहितम्

अ.  कुचेलः श्रीकृष्णस्य **मित्रम्** ।
    कंसः ................................ ।

आ.  सर्वाणि कार्याणि **विचार्य** करणीयानि ।
    ............................ न करणीयानि ।

इ.  मेघाः पृथिव्यै जलं **यच्छन्ति** ।
    वृक्षाः पृथिव्याः ......................।

ई.  सज्जनः समाजाय **हितं** करोति ।
    दुर्जनः ................................ ।

६.  **उपरितनवाक्यानि अनुसृत्य एतैः पदैः वाक्यानि निर्मान्तु ।**

अ.  गुणाः x दोषाः

आ.  कारणम् x अकारणम्

इ.  कृत्रिमम् x सहजम्

## V. सर्जनात्मकव्यक्तीकरणम्



१.  **पाठ्यभागस्य सारम् आधारीकृत्य मित्राय पत्रं लिखन्तु ।**

२.  **अधः आन्ध्रभाषया कविता दत्ता अस्ति । पठन्तु, संस्कृतेन परिवर्त्य लिखन्तु ।**

నేస్తాలు మన నేస్తాలు.
కల్లాకపటం తెలియనివారు
కష్టాల్లో కాపాడేవారు
తోడుగ నీడగ ఉండేవారు  ॥ నేస్తాలు ॥

## VI. प्रशंसा



१.  **अधः दत्तानि वाक्यानि पठन्तु । भवान् किं करोति, किं न करोतीति जानातु ।**

अ.  अहं मित्राय सर्वदा साहाय्यं करोमि ।

आ.  अहं मित्रम् असत्यं न वदामि ।



© SCERT not to be republished

इ.  अहं मित्राय क्रुध्दः न भवामि । तत् न दुःखयामि ।
ई.  मम वस्तूनि मित्रस्य उपयोगाय ददामि ।
उ.  अहं मित्रैः सह क्रीडामि ।
ऊ.  मम अज्ञातान् विषयान् मित्रं पृच्छामि ।

## VII. व्याकरणांशाः



**१. उदाहरणानुसारं पदविभागं कुर्वन्तु ।**

उदा -स्नेहमकृत्रिमम् - स्नेहम् + अकृत्रिमम्

अ. गुह्यमाख्याति = ........ + ...........
आ. मित्रमुच्यते = ........ + ...........
इ. लक्षणमिदम् = ........ + ...........
ई. छायामाश्रितः = ........ + ...........
उ. स्वयमेव = ........ + ...........

**२. उदाहरणानुसारं पदानि योजयन्तु ।**

उदा - एवम् + एव = एवमेव
अ. इदम् + अत्र = ......................
आ. त्वम् + अपि = ......................
इ, कथाम् + उपदिशति = ......................
ई, सर्वम् + ऐश्वर्यम् = ......................

**३. पदानि विघटयन्तु ।**

अ. सन्मित्रम् = ................ + ................
आ. षड्विधम् = ................ + ................
इ. केनेन्दुः = ................ + ................
ई. नेत्रयोरिव = ................ + ................

**४. वाक्यानि पठन्तु, रेखाङ्कितानि पदानि अवगच्छन्तु ।**

अ. किशोरः अम्बायाः वचनं श्रुत्वा स्नानार्थं गतवान् ।
आ. गोपालः स्नानं कृत्वा पूजां करोति ।
इ. गौतमः क्रीडित्वा पाठं पठति ।

**उपरितनवाक्येषु रेखाङ्कितानि पदानि ‘क्त्वा’प्रत्ययान्तानि ।**

©SCERT not to be republished

५. **वाक्यानि पठन्तु, रेखाङ्कितानि पदानि अवगच्छन्तु ।**

अ. सिध्दार्थः उपविश्य पाठं पठति ।
आ. वाणी आगत्य परीक्षां लिखति ।
इ. पितामही उपनेत्रं विस्मृत्य गतवती ।

**उपरितनवाक्येषु रेखाङ्कितानि पदानि ल्यप् प्रत्ययान्तानि ।**

७. **अधः आवरणे दत्तैः क्रियापदैः सह ल्यप्क्त्वाप्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयन्तु ।**

नन्दकिशोरः प्रातः..........(उत्तिष्ठति) दन्तधावनं करोति । स्नानं........(करोति) देवं पूजयति । अल्पाहारं करोति । ततः विद्यालयं..........(गच्छति) कक्ष्यायाम्.........(उपविशति) पाठान् शृणोति ।

७. **अधः क्रियापदानि सन्ति । मित्राणाम् उपाध्यायस्य वा साहाय्येन तैः क्त्वा प्रत्ययं, ल्यप् प्रत्ययं वा योजयित्वा लिखन्तु ।**


उदा - क्त्वा - धावति - धावित्वा
ल्यप् - प्रक्षालयति - प्रक्षाल्य

| | |
|---|---|
| १. पिबति | ६. विचारयति |
| २. शृणोति | ७. विस्मरति |
| ३. लिखति | ८. आनयति |
| ४. पठति | ९. आगच्छति |
| ५. नमति | १०. विलिखति |



## परियोजनाकार्यम्

मैत्रीसम्बद्धान् श्लोकान् सङ्गृह्य, लिखित्वा भित्तिपत्रे संलग्नीकुर्वन्तु । तेषां भावान् च लिखित्वा कक्ष्यायां श्रावयन्तु ।



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. श्लोकान् रागयुक्ततया / भावयुक्ततया पठितुं शक्नोमि । | आम् / न |
| २. पाठस्य आधारेण वाक्यानि संस्कृतीकर्तुं शक्नोमि । | आम् / न |
| ३. पाठसारं स्वीयवाक्यैः लेखितुं शक्नोमि । | आम् / न |

**सत्यं वद । धर्मं चर ।**

© SCERT not to be republished